International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(1): 28-29
© 2018 IJSR
www.anantaajournal.com
Received: 09-11-2017
Accepted: 10-12-2017

**डॉ० शिवकुमार मिश्र**
संस्कृत विभाग,
कुँवरसिंहमहाविद्यालय,
लहेरियासराय, दरभंगा, बिहार, भारत

**Correspondence**
**डॉ० शिवकुमार मिश्र**
संस्कृत विभाग,
कुँवरसिंहमहाविद्यालय,
लहेरियासराय, दरभंगा, बिहार, भारत

# आयुर्वेदस्य विशेषज्ञो महाकविमाघः

**डॉ० शिवकुमार मिश्र**

**प्रस्तावना**

विश्ववाङ्मयरत्नायमान–संस्कृतसाहित्यस्यालङ्कृतशैल्याः प्रतिस्पर्धी महाकविर्माघो निर्विवादत्वेन प्रकाण्डपण्डितः स्वीक्रियते समालोचकैः। तेन शिशुपालवधे प्रायः सर्वशास्त्रीयं पाण्डित्यं प्रकटीकृतम्। तेषु विविधशास्त्रेषु महाकाव्येऽस्मिन् आयुर्वेदशास्त्रस्य यादृशं वर्णनम् प्रस्तुतविधानेन विहितं तत् सर्वथा महाकवेरस्य चिकित्साविज्ञानस्य सूक्ष्मज्ञानस्य परिचायको वरिवर्ति। अतएव प्रकृतनिबन्धे माघस्य आयुर्वेदशास्त्रीयज्ञानस्य सम्यक् विवेचनं विधीयते।

आयुर्वेदशास्त्रे यथा स्वेदनयोग्यस्य ज्वरस्य शान्तये जलषेकस्य निषेधः क्रियते। [1] तदनुसारमेव बलरामेण भणितं यत् दण्डनीयशत्रौ सामस्य प्रयोगो हानिकारक एव भवति यतः स्वेदन योग्यस्य ज्वरस्य परिशान्तये कः जलाभिषेकं विदधाति? [2]

अनेनैव प्रकारेण आयुर्वेदे यथा चिरपपश्चसेवनात् क्रमशः असाध्यरोगः समुत्पद्यते [3] तथैव भणितमुद्धवेन यत् शत्रुभिः कृतेऽवकारेऽपि यः बुद्धिमान् पुरुषः स्वमनोविकारम् प्रकटयन् समये समागते सति तथैव क्रुधति यथाऽपथ्यसेवनादपि स्वविकारमप्रकटीर्कुन् असाध्यः रोगः यथाकालं स्वकीयं क्रोधरूपं विकारं प्रकटी करोति। [4]

पुनः महाकविना माधेन आयुर्वेदविहितलक्षणानुसारमेव राजयक्ष्मारोगस्य सुष्ठु प्रतिपादनं विहितम्। राजयक्ष्मा रोगस्य वर्णितानि चत्वारि कारणानि चिकित्साशास्त्रे। तेषु कारणेषु कारणमेकं बलापेक्षया कार्याविधिक्यमपि स्वीक्रियते। [5] एतदनुरूपमेवोद्धवेन भणितं यत् शक्यविषये शरीरधारिणां व्यायामादिक्रियया शक्तिवर्धते तथा प्रतिकूलतया कार्याधिक्यात् शक्तिः क्षीयते। [6]

आयुर्वेदशास्त्रे राजयक्ष्मायाः पूर्वं पश्चाच्च रोगाः विद्यन्ते बहवः। तथैव शिशुपालवधे उद्धवेन निगदितम् यत् राजयक्ष्मा यथा रोगाणां समूहो भण्यते तथैव शिशुपालः राजभिः परिवृतो विद्यते।[7] अत्र शिशुपालोऽप्रस्तुतविधानेन राजयक्ष्मारूपेण वर्णितः राजानश्च तस्य सहकारिरोगरूपेण निरूपिताः।

एवमेव रसायनोपयोगः आयुर्वेदशास्त्रे मात्रानुसारमेव विद्यातव्य इति संकेतोऽपलभ्यते। अनेन दीर्घायुः स्मृतिः, मेधा, आरोग्यम्, तरूणावस्था, उज्ज्वलकान्ति, शरीरेन्द्रियबलप्राप्तिः, वाक्सिद्धिः, सम्भोगक्षमता, कान्तिः इत्येते सर्वे लाभाः समधिगम्यन्ते। [8]

एतदनुरूपमेवोद्धवेन निगदितं यत् सामर्थ्यं कामयमानेन जनेन षड्गुणरूपरसायनस्य चन्द्रोदयादि रसायनस्य वा सेवनमवश्यं विधातव्यम्। अनेन तस्य जनस्य हस्तपादाद्यत्रनि स्थिराणि बलवन्ति च भवन्ति। [9]

पुनः अपस्मार रोगस्य विषये चिकित्साशास्त्रे वर्णितम् यत् अस्य रोगी दन्तान् चालयति, असद्रूपं पश्यति, पृथिव्यां पतति, व्यर्थक्रियाः प्रकटयति, विभेति च परन्तु वेगे समाप्ते सति रोगी स्वयमेव शान्तो भवति। [10] एवमेव शिशुपालवधे अपस्मारोति। नः समुद्रेन सहोत्पेक्षामूलिका तुलना विहिता। समुद्रोऽपि भूम्यां प्रसूतो विद्यते, अयमपि उच्चैः ध्वनिं विदधाति, अयम् तरंगैः विविधरूपं दधाति तथा फेनायमानो विद्यते। [11] वस्तुतः एतादृशी तुलना माघस्य चिकित्सा विषयकसूक्ष्मनिरीक्षणशैल्याः परिचायिका प्रतिभाति।

आयुर्वेदे विलक्षणं महत्त्वं स्वीक्रियते उपवासचिकित्सायाः। मोहातिस्न्तिधज्वर कुष्टप्लीहा– स्थूलतादि रोगाणां चिकित्सा उपवासेन विधीयते। [12] तथैव माधेन वर्णित यत् विविध रोगैक्रान्ताणां सामर्थ्यहीनानां रोगिणां चिकित्सां कुशलः वैधः उपवासेन प्रारभते। [13]

अनेननैव क्रमेण स्वकीयमायुर्वेदविषयकज्ञानं प्रकटयता माधेन वर्णितं यत् भगवता श्रीकृष्णेन पूर्वं शिशुपालेन प्रयुक्तानि सशक्तान्यस्त्राणि विनाशितानि पश्चाच्याल्पशक्तियुक्तान्यस्त्राणि। [14] एतादृशं विधानमायुर्वेदेऽपि समुपलभ्यते। तत्रा रोगोत्पन्नेषु उपद्रवेषु पूर्वं कठिनोपद्रवरू चिकित्सा विधातव्या पश्चाच्य क्रमशः अल्पोपद्रवस्येति। [15]

निष्कर्षतः प्रतिस्पर्धिमहाकविमाधेन स्वकीयशिशुपालवधे सर्वतोमुखं पाण्डित्यं प्रकटयता यादृशं पाण्डित्यमायुर्वेदशास्त्रीये प्रदर्शितं तत् सर्वथा प्रशंसनार्थमिति। अतएव निःसंकोचं मयाभिधातुं शक्यते–

''पण्डितः सर्वशास्त्राणां माधो नाम महाकविः।
सिद्धयति स विशेषज्ञः आयुर्वेदस्य सर्वथा।। [16]
शिवकुमारमिश्रेण चित्रितं वै यथामति।
चिकित्साशास्त्र पाण्डित्यं माघेन परिवर्णितम्।।44।।

**संदर्भाः**


1. स्नानाभ्यत्रप्रदेहांश्च परिशेष चल¬नम्''
–अष्टाङ्गहृदय चिकित्सा स्था०0–1/17।
2. चतुर्थोपायसाध्ये तु रिपो सान्त्वमपक्रिया।
स्वेद्यमामज्वरं प्राज्ञः कोऽम्भसा परिर्षिति।
–शि०व०–2/54।
3. सर्वेषामेव रोगाणां निदानं कुपिता मलाः।
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम्।।
–माधवनिदान–पंलक्षणनिदान–14/20।
4. कृतापचारोऽपि परैरनाविष्कृतविक्रियः।
असाध्यः कुरूते कोपं प्रति काले गदो यथा।
–शि०व०–2/84।
5. साहसं वेगसंरोधः शुक्रौजः स्नेहसंक्षयः।
अन्नपानविधित्यागश्चत्वारस्तस्य हेतवः।।
–अष्टा०नि०स्था०–5।
6. स्थाने शमवतां शक्त्या व्यायामे वृद्धिरत्रिनाम्।
अयथाबलमारम्भो निदानं क्षयसम्पदः।।
–शि०व०–2/94।
7. अनेकरोगानुगतो बहुरोगपुरोगमः।
राजयक्ष्मा क्षयः शोषो रोगराडिति च स्मृतः।।
–अष्टा० नि० स्था०–5/1।
8. मा वेदि यदसावेको जेतव्यश्चेदिराडिति।
राजयक्ष्मेव रोगाणां समूहः स महीभृताम्।।
–शि०व०–2/96।
9. ''अल्पमात्रोपयोगित्वात्''–रसेन्द्रसारसंग्रह।
''दीर्घमायुः स्मृति–रसायनात्''
–अष्टा०–39।
10. षाड्गुण्यमुपयुञ्जत शक्त्यपेक्षो रसायनम्।
भवन्त्यस्यैवनत्रनि स्थास्नूनि बलवन्ति च।।
–शि०व०–2/93।
11. ''क्रुद्धैधातुभि–''शि०व०–3/72 (सर्वंकषायामुद्धृतम्)।
12. आश्लिष्टभूमिं रसितारमुच्चैर्लोलद्भुजाकार बृहन्तरत्रम्।
फेनायमानं पतिमापगानामसावपस्मारिणमाशशौ।।
–शि०व०–3/73।
13. वाग्भट सू० स्था०–14/11–12।
14. स्रस्तात्रसन्धौ विगताक्षपाटवे सजानिकामं विकलीवृते रथे।
आप्तेन तक्ष्णा भिषजेव तत्क्षणं प्रचक्रमे ल¬नपूर्वकः क्रमः।।
–शि०व०–12/24।
15. इति नरपतिरस्त्रां यद्यदाविश्चकार
प्रकुपित इव रोगः क्षिप्रकारी विकारम्–''
शिशुपालवधे–20/76।
16. ''वर्धनेनैकदोषस्य क्षपणेनोच्छ्तिस्य च।''
–अष्टा॰ चि० स्था०–1/146।